শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধেঃ কৃতিষু

# ॥ শ্রীহযগ্রীৱস্রগ্ধরা ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীহযগ্রীৱস্রগ্ধরা ॥

কৱিতাজিতকল্লোলিকন্যকাকান্তৱক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ ॥

অগ্রে পশ্যামি তেজঃ কিমপি হযমুখং ৱর্ধকং ৱারিরাশেঃ
ৱিদ্যারূপস্য হৃদ্যং ৱিশদশশিনিভং পদ্মজাতাভিনন্দ্যম্।
শঙ্খং চক্রং চ পুস্তং ৱিৱৃতিরতিমতীং জ্ঞানমুদ্রাং চ লক্ষ্মীং
বিভ্রদ্ ৱিভ্রাজমানং শ্রুতিততিমহিতং লোচনানেকদৃশ্যম্॥ 1 ॥

অগ্রে পশ্যামি নিত্যং হযৱদনমহং ধাম মান্যং পৱিত্রং
শীতং ৱিদ্যোতমানং মধুরমতিতমাং মঙ্গলং দর্শনীযম্।
দুগ্ধাম্ভোধেরুদীতাং কমলৱনসখীং লালযদ্বামভাগে
লক্ষ্মীমঙ্কে নিৱিষ্টাং শশিনমধিৱসদ্ দিৱ্যভৱ্যানুভাৱম্॥ 2 ॥

অগ্রে পশ্যামি ভূযঃ ধৱলতমমহং ধাম সর্ৱোত্তমং তৎ
লক্ষ্ম্যা ৱামাঙ্কভাজা মৃদুলনিজভুজাশ্লিষ্টপৃষ্ঠং ৱরিষ্ঠম্।
ৱাজীন্দ্রাস্যং স্বহেষাৱিধুতনতজনানন্তনানাৱিধাঘং
মানাতীতানুভাৱং মুনিজনমনসাং লক্ষ্যমেকং পৱিত্রম্॥ 3 ॥

অগ্রে পশ্যামি ভান্তং ধৱলমতিতরাং ৱাজিৱক্ত্রং পুরাণং
যেন প্রেষ্ঠেন কামং জিত ইহ মহসা শীতশুদ্ধেন সোঽযম্।
নিত্যং ধত্তে নিষণ্ণং নিজসুভগতনৌ দুগ্ধপাথোধিজাতঃ
চন্দ্রোঽযং দেৱদেৱং ৱিধিৱিহিততপোজাতসঞ্জাতমূর্তিম্॥ 4 ॥

অগ্রে পশ্যামি নাথং মতিকৃতিৱিহৃতং ৱামভাগাঙ্কভাজা
ৱিদ্যামূর্ত্যা শ্রিযা যঃ করকমলজুষা দিৱ্যসৌরভ্যভাজা।

লীলাপদ্মেন সংৱীজিতনিজৱদনঃ শ্রান্তিহীনো নিতান্তং
নিত্যং ৱেদাংস্তদর্থানপি কিল কথযন্ তং পুমাংসং হযাস্যম্॥ 5॥

দৃগ্ভ্যাং পদ্মাকৃতিভ্যাং দিনকররজনীকান্ততুল্যাকৃতিভ্যাং
চক্রশ্রীশঙ্খরাভভ্যাং ৱিরচিতনিমিষোন্মেষলীলাভরাভ্যাম্।
আভ্যাং দেৱাদিদেৱো হযৱরৱদনো মানুষাকারদেহঃ
সংসারেঽস্মিন্ চরন্তং হযমিৱ সরযং মানুষং মাং স পাতু॥ 6॥

আস্তামস্মৎপুরস্তাদনঘশুভগুণো দেৱদেৱো হযাস্যঃ
হেষাৱিক্ষিপ্ততত্তন্ৱিমতকলকলো দিৱ্যসৌন্দর্যভূমিঃ।
হৎৱা সদ্যস্সুদুষ্টং মধুমসুরৱরং ৱেধসঃ কর্ণজাতে
ৱর্ষন্ হর্ষেণ রস্যাঃ মধুমযফণিতীঃ ৱেদৱেদাঙ্গসক্তাঃ॥ 7॥

অঙ্কে কৃৎৱা কৃশাঙ্গীং হিমকরনিলযশ্শঙ্খকৢপ্তাভিষেকাং
শীতৈস্সংৱেপমানাং ইতরকরগতং দর্শযন্ চক্ররাজম্।
আশ্ৱাস্যাশ্লিষ্য হেষামযমধুররৱৈর্দেৱদেৱো হযাস্যঃ
নিত্যং মচ্চিত্তরঙ্গে কলযতু নটনং মোদবোধস্বরূপঃ॥ 8॥

ৱেগাৎ প্রত্যূহহীনং জনযিতুমিৱ নস্সন্নতানাং মুখেভ্যঃ
ৱাচামুচ্চৈঃ প্রৱাহং ৱিহিতহিতমহাৱাজিৱক্ত্রাৱতারঃ।
শ্রীমান্ ৱাগীশ্ৱরোঽযং ধৱলশুভতনুশ্শুদ্ধসত্ত্বস্বরূপঃ
সৎৱং নস্সংৱিধত্তাং প্রকটিতকরুণো নীরজো নিস্তমস্কম্॥ 9॥

মন্দোঽপ্যানন্দপাথোনিধিকুহরগতান্
কর্তুমীষ্টে বুধেন্দ্রান্
ৱাচামুচ্চৈর্ৱিলাসৈর্নৱরসভরিতৈ -
শ্শ্রীহযাস্যো যদি স্যাৎ।
কিঞ্চিচ্চিত্তে নিৱিষ্টো ৱিমলনিজতনু -
শ্শঙ্খচক্রে সপুস্তাং

ৱ্যাখ্যামুদ্রাং চ লক্ষ্মীং করকৃতকমলাং
 সংৱহন্ সুস্মিতাস্যাম্॥ **10** ॥

স্রগ্ধরাং শ্রীনিধেরুত্থিতাং যো ৱহেৎ
 ৱাজিরাজাননং ৱর্ণযন্তীমিমাম্।
স্রগ্ধরাস্রগ্ধরঃ কণ্ঠতোস্মীতি সঃ
 ৱাদিরাজাজিতস্সজ্জযং ৱিন্দতি॥ **11** ॥

॥ ইতি শ্রীহযগ্রীৱস্রগ্ধরা সমাপ্তা॥

sunder kidambi prapatti dot com sunder kidāmbi